नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

Question Booklet No.

No. of Questions – **19**

No. of Printed Pages – **11**

**S-71-Sanskritam (T.L.) (D&D)**

# माध्यमिक (मूक–बधिर) (CWSN) परीक्षा, 2025

# SECONDARY (D&D) (CWSN) EXAMINATION, 2025

## तृतीय भाषा – संस्कृतम्

**समय : 4.15 (सपादचतुरवादनम्)**

**पूर्णाङ्का : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशा :**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामाङ्कः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्ड – अ

वस्तुनिष्ठप्रश्ना: **[17×1=17]**

**1.** बहुविकल्पात्मकप्रश्ना: –

i) का सभ्यता निसर्गे समाविष्टा न स्यात् ? **[1]**
अ) नूतना ब) पाषाणी
स) प्राचीना द) अर्वाचीना

ii) राजपुत्र–राजसिंहस्य भार्या आसीत् – **[1]**
अ) सत्यवती ब) लक्ष्मीवती
स) भानुमती द) बुद्धिमती

iii) कुशलवयो: पितुर्नाम किम् अस्ति ? **[1]**
अ) लक्ष्मण: ब) भरत:
स) राम: द) शत्रुघ्न:

iv) क: क्षेत्रकर्षणं कुवन् आसीत् ? **[1]**
अ) कृषक: ब) शिक्षक:
स) वणिक् द) धावक:

v) मनुष्याणां शरीरस्थ: महान् शत्रु: किम् ? **[1]**
अ) दौर्बल्यम् ब) सौन्दर्यम्
स) आलस्यम् द) उद्योगम्

vi) निर्धन: जन: स्ववित्तेन स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जात: ? **[1]**
अ) महाविद्यालये ब) देवालये
स) विद्यालये द) कार्यालये

vii) कस्य उपशमनस्य स्थिरोपाय: नास्ति ? **[1]**
अ) जलप्लावनम् ब) रोगस्य
स) अज्ञानस्य द) भूकम्पस्य

viii) प्रकृति: + एव इत्यस्य सन्धिपदम् अस्ति – **[1]**
अ) प्रकृति: एव ब) प्रकृतिरेव
स) प्रकृत् एव द) प्रकृदेव

ix) व्यञ्जनसन्धेः उदाहरणमस्ति – [1]

अ) कुर्वन्नासीत् ब) तयोरेकः

स) नोत्थितः द) विद्यालयः

x) विसर्गसन्धेः उदाहरणमस्ति – [1]

अ) नास्ति ब) अनुक्तमपि

स) योजकस्तत्र द) भोजनान्ते

xi) "जगदीशः" इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति – [1]

अ) जगत + ईशः ब) जगत् + इशः

स) जगद + इशः द) जगत् + ईशः

xii) "अभितः" इति पदयोगे का विभक्तिः भवति ? [1]

अ) द्वितीया ब) तृतीया

स) चतुर्थी द) पञ्चमी

xiii) "नमः" इति पदयोगे का विभक्तिः भवति ? [1]

अ) तृतीया ब) चतुर्थी

स) पञ्चमी द) षष्ठी

xiv) "अन्वधावत्" इत्यत्र पदे कः उपसर्गः ? [1]

अ) अन्व ब) उप

स) आङ् द) अनु

xv) 'निस्सरन्ती' इत्यत्र उपसर्गं शब्दञ्च पृथक् कृत्वा लिखत – [1]

अ) निर् + सरन्ती ब) निः + सरन्ती

स) निस्स + रन्ती द) निस् + सरन्ती

xvi) लिख् – धातोः लट् – लकारस्य रूपमस्ति – [1]

अ) लेखिष्यति ब) अलिखत्

स) लिखतु द) लिखति

xvii) पुत्रस्य दैन्यं दृष्ट्वा अहं <u>रोदिमि</u> रेखांकितपदे को धातुः ? [1]

अ) रुद्र–धातुः ब) रम्–धातुः

स) रुद्–धातुः द) रोद्र–धातुः

**2.** निर्देशानुसारं रिक्तस्थानानि पूरयत – **[5×1=5]**

i) श्रृगालः ___________ आह । (हस् + शतृ) **[1]**

ii) सा माता स्वगुरुं ___________ प्रकटयति (कृतज्ञ + तल्) **[1]**

iii) श्रिया ___________ वाणी । (युक्तः + टाप्) **[1]**

iv) चौरस्य ___________ प्रबुद्धः अतिथिः । (पादध्वनिशब्दे तृतीया) **[1]**

v) अत्र ___________ भ्रमराः गुञ्जन्ति । (पुष्पशब्दस्य सप्तमीबहुवचनम्) **[1]**

**3.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

महाराणाप्रतापस्य जन्म 1540 ख्रीस्ताब्दस्य मईमासस्य नवमदिनांके मेवाडस्थप्रसिद्धे कुम्भलगढ–दुर्गे महाराणा–उदयसिंहस्य पुत्ररूपेण अभवत् । मुगलशासकस्य अकबरस्य प्रबलविरोधिरूपेण वीरोऽयं प्रसिद्धः । तस्य अश्वस्य नाम 'चेतक' इति आसीत् । महाराणाप्रतापः 'कीका' इति नाम्ना अपि प्रथितः आसीत् । महाराणा–प्रतापस्य एकः रामप्रसादनामकः प्रसिद्धः गजः अपि आसीत् ।

क) एकपदेन उत्तरत – **[1×2=2]**

i) महाराणा–प्रतापस्य पितुर्नाम किम् आसीत् ? **[1]**

ii) महाराणाप्रतापस्य अश्वस्य नाम किमासीत् ? **[1]**

ख) पूर्णवाक्येन उत्तरत – **[2]**

i) महाराणाप्रतापस्य जन्म कदा अभूत् ?

ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **[1]**

घ) भाषिककार्यम् – **[1×3=3]**

i) "प्रसिद्धः गजः" इत्यत्र विशेष्यपदं लिखत । **[1]**

ii) "वाजी" इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत । **[1]**

iii) "एकः रामप्रसाद नामकः प्रसिद्धः गजः अपि आसीत् ।" इत्यत्र "आसीत्" इति क्रियापदस्य कर्तृपदं लिखत । **[1]**

## खण्ड – ब

**4.** राजन् ! अलम् <u>अतिदाक्षिण्येन</u> । रेखांकितपदे विभक्तिं तत्कारणञ्च लिखत । **[2]**

**5.** अधोलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत । **[1×2=2]**

अ) 105 ब) 150

6. धेनूनां माता सुरभिः आसीत् । रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत । [2]

7. अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसंगं भावार्थं लिखत । [2]

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ।।

8. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत । [2]

एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ।।
अन्वयः एकेन (i) ............... सरसः या (ii) ............... भवेत्, (iii) ............... तीरवासिना (iv) ............... सा (शोभा) न (भवति) ।।

| शोभा, परितः, राजहंसेन, बकसहस्रेण |
|---|

9. स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात् । [2]

10. अधोलिखितपाठ्योः कस्यचिदेकस्य पाठसारं हिन्दीभाषायां लिखत । [2]

i) शिशुलालनम्

ii) भूकम्पविभीषिका ।

## खण्ड – स

11. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् । अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत । सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत् । तथापि वृषः नोत्थितः ।

क) एकपदेन उत्तरत – [1]
कृषकः किं कुर्वन्नासीत् ?

ख) पूर्णवाक्येन उत्तरत – [2]
वृषभः कुत्र पपात ?

ग) भाषिककार्यम् – [1×2=2]

i) "कश्चित् कृषकः" इत्यत्र विशेषणपदं किम् ? [1]

ii) "क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत् ।" इत्यत्र क्रिया पदं किम् ? [1]

**अथवा**

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान् । न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान् । सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम् किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत् । ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान् । अन्येद्युः तौ न्यायालये स्व-स्व-पक्षं पुनः स्थापितवन्तौ ।

क) एकपदेन उत्तरत –
न्यायाधीशस्य नाम किमासीत् ? [1]

ख) पूर्णवाक्येन उत्तरत –
न्यायाधीशः किमर्थं निर्णेतुं नाशक्नोत् ? [2]

ग) भाषिककार्यम् – [1×2=2]

i) "सर्वं वृत्तम् अवगत्य स तं निर्दोषम् अमन्यत् ।" इत्यत्र सर्वनामपदं किम् ? [1]

ii) "अग्रिमे दिने उपस्थातुम् आदिष्टवान् ।" इत्यत्र कर्तृपदं किम् ? [1]

**12.** अधोलिखितं श्लोकं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयता –
मम्भोदा बहवो भवन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

क) एकपदेन उत्तरत –
अम्भोदाः कुत्र सन्ति ? [1]

ख) पूर्णवाक्येन उत्तरत –
वृष्टिभिः वसुधां के आर्द्रयन्ति ? [2]

ग) भाषिककार्यम् – [1×2=2]

i) "गर्जन्ति केचिद् वृथा ।" इत्यत्र क्रियापदं किम् ? [1]

ii) "दीनं वच:" । इत्यत्र विशेषणपदं किम् ? [1]

**अथवा**

सेवितव्यो महावृक्ष: फलच्छायासमन्वित: ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ।।

क) एकपदेन उत्तरत –

छायां क: ददाति ? [1]

ख) पूर्णवाक्येन उत्तरत –

अस्माभि: कीदृश: वृक्ष: सेवितव्य: ? [2]

ग) भाषिककार्यम् – [1×2=2]

i) "महावृक्ष: फलच्छायासमन्वित: ।" इत्यत्र विशेषणपदं किम् ? [1]

ii) "यदि दैवात् फलं नास्ति" इत्यत्र क्रियापदं किम् ? [1]

**13.** अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

राम: – एष भवतो: सौन्दर्यावलोकजनितेन कौतुहलेन पृच्छामि–क्षत्रियकुल–पितामहयो: सूर्यचन्द्रयो: को वा भवतोर्वंशस्य कर्त्ता ?

लव: – भगवान् सहस्रदीधिति: ।

राम: – कथमस्मत्समानाभिजनौ संवृत्तौ ?

विदूषक: – किं द्वयोरप्येकमेव प्रतिवचनम् ?

लव: – भ्रातरावावां सोदर्यौ ।

राम: – समरूप: शरीरसन्निवेश: । वयसस्तु न किञ्चिदन्तरम् ।

लव: – आवां यमलौ

राम: – सम्प्रति युज्यते । किं नामधेयम्

क) एकपदेन उत्तरत –

"कथमस्मत्समानाभिजनौ संवृत्तौ ?" इति क: पृच्छति ? [1]

ख) पूर्णवाक्येन उत्तरत –
कुशलवयोः वंशस्य कर्त्ता कः ? [2]

ग) भाषिककार्यम् – [1×2=2]

i) "आवां यमलौ ।" वाक्येऽस्मिन् सर्वनामपदं किम् ? [1]

ii) "भगवान् सहस्रदीधितिः"। इत्यत्र विशेषणपदं किम् ? [1]

**अथवा**

काकः – आम् सत्यं कथितं त्वया– वस्तुतः वनराजः भवितुं तु अहमेव योग्यः ।

पिकः – (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का–का इति कर्कशध्वनिना वातावरणमाकुली करोषि । न रूपम्, न ध्वनिरस्ति । कृष्णवर्णम् मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

काकः – अरे! अरे! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा – 'अनृतं वदसिचेत् काकः दशेत् ।'

क) एकपदेन उत्तरत –
वस्तुतः वनराजः भवितुं तु अहमेव योग्यः । इति कः कथयति ? [1]

ख) पूर्णवाक्येन उत्तरत –
कः वातावरणं कर्कशध्वनिना आकुलीकरोति ? [2]

ग) भाषिककार्यम् – [1×2=2]

i) किं जल्पसि ? इत्यत्र क्रियापदं किम् ? [1]

ii) कृष्णवर्णः अहं । इत्यत्र विशेषणपदं किम् ? [1]

**14.** यथानिर्देशम् उत्तरं लिखत । [1+1+1=3]

क) चतुर्णां युगानां समाहारः (समस्तपदं लिखत) [1]

ख) पितरौ (समासविग्रहपदं लिखत) [1]

ग) यथाशक्ति (समासस्य नाम लिखत) [1]

**15.** मञ्जूषाया: प्रदतै: समुचितै: अव्ययपदै: वाक्यानि पूरयत । **[1+1+1=3]**

| यावत् ; तदा; तर्हि |
|---|

क) यदा मेघा: गर्जन्ति ………… वर्षा भवति । **[1]**

ख) यदि पुस्तकं न पठिष्याम: ………… अनुत्तीर्णा: भविष्याम: । **[1]**

ग) ………… भोजनं न मिलति तावत् बुभुक्षा भवति । **[1]**

## खण्ड – द

**16.** भवान् नगेन्द्र:, राजकीय – उच्च माध्यमिक – विद्यालय:, हरिनगरस्य छात्र: रुग्णताकारणेन दिनत्रयस्य अवकाशाय प्राचार्याय प्रार्थनापत्रं लिखतु । **[4]**

**अथवा**

भवत: नगरस्य उद्याने स्वच्छता नास्ति, बालक्रीडाया: साधनानि अपि न सन्ति । अत: व्यवस्थाया: कृते नगरपालिकाध्यक्षाय पत्रं मञ्जूषाया: उचितपदानि चित्वा रिक्तस्थानानि पूरयतु । **[4]**

| मनांसि, निवेदनम्, परिक्षेत्रे, नगरपालिकाध्यक्ष:, नगरस्य, कृपया, कर्मकरान्, सन्ति |
|---|

सेवायाम्

(i) …………

नगरपालिका

जयनगरम्

विषय: – नगरस्य उद्याने स्वच्छता–बालक्रीडाया: साधनानि इति क्रमे ।

महोदये !

(ii) ………… अस्ति यत् अस्माकं (iii) ………… उद्यानस्य

(iv) ………… स्वच्छता नास्ति । तत्र बालक्रीडार्थं क्रीडकानि अपि न (v) ………… ।

क्रीडां विना अस्माकं (vi) ………… न रमन्ते । अत: (vii) ………… स्वच्छताया: समुचित–व्यवस्थायै (viii) ………… आदिशयन्तु ।

सधन्यवादम्

प्रार्थी

महेश:

बी–3/76

पुष्पविहारम्

जयनगरम्

**17.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्ट-वाक्यानि निर्माय लिखत । **[4]**

| |
|---|
| रेलस्थानकम्, रेलयानम्, यात्रिणः, आरोहन्ति, अवरोहन्ति, गच्छन्ति, आगच्छन्ति, उपविशन्ति |



**अथवा**

मञ्जूषायाः उपयुक्तपदानि गृहीत्वा अध्ययन विषये पितापुत्रयोः संवादं पूरयतु । **[4]**

| |
|---|
| अध्यापकः, काठिन्यम्, व्यवस्थां, स्थानान्तरणम्, विषये, अंग्रेजी-विषये, समीचीनम्, अध्ययनम् |

पिता – गोपेश ! तव (1) ............... कथं प्रचलति ?

गोपेशः – हे पितः ! अध्ययनं तु (2) ............... प्रचलति ।

पिता – कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं (3) ............... अनुभवसि ?

गोपेशः – आम् ! (4) ............... मम स्थितिः सम्यक्नास्ति । यतो हि अस्माकं विद्यालये अंग्रेजी - विषयस्य (5) ............... नास्ति ।

पिता – त्वं पूर्वं तु माम् अस्मिन् (6) ............... न उक्तवान् ।

गोपेशः – पूर्वं तु अध्यापकः आसीत् परं अधुना तस्य (7) ............... अन्यत्र अभवत् ।

पिता – अस्तु । अहं तव कृते अध्यापकस्य (8) ............... करिष्यामि ।

**18.** अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत । **[4]**

i) विद्यालय के चारों ओर आम के पेड़ है ।

ii) राजा भिक्षुकों को भोजन देता है ।

iii) मोर नाचता हैं ।

iv) हम सब रामायण पढ़ेंगे ।

v) अयोध्या के राजा दशरथ थे ।

vi) बालकों को मिठाई पसन्द हैं ।

**19.** अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखत । **[3]**

i) तदा तस्य मुखात् रोटिका अपि जले पतति ।

ii) एकदा कश्चित् कुक्कर: एकां रोटिकां प्राप्नोत् ।

iii) तदा स: नदीजले स्वप्रतिबिम्बम् अपश्यत् ।

iv) स: कुक्कर: रोटिकां प्राप्तुं तेन सह युद्धार्थं मुखम् उद्घाटयति ।

v) स: रोटिकां मुखे गृहीत्वा गच्छन् आसीत् ।

vi) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा स: तस्य रोटिकां प्राप्तुम् अचिन्तयत् ।

**अथवा**

अध: मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन षड् वाक्यानि "धेनु–महिमा" इति विषये लिखत । **[3]**

| |
|---|
| दुग्धम्, पोषयति, श्रीकृष्ण:, कामधेनु:, गोमूत्रम्, माता, नवनीतम्, पञ्चामृतम् । |

DO NOT WRITE ANYTHING HERE